# Sigru

शिग्रुर्मूलकपत्रो बहुलदलस्तीक्ष्णगन्धश्च ।
अपदंशः शीघ्रफलो बहुलत्वक् हरितशाकः स्यात् ॥
मधुशिग्रुः सितमरिचो मधुस्रवः कृष्णगन्धश्च ।
प्रोक्तः सौभाञ्जनकः शिग्रुकसंज्ञो मुरिङ्गीति ॥
स एव चाच्छवृक्षः स्यान्मुखवासाह्वयस्था ।
कथितः स एव बहलः श्वेततरु श्वेतमञ्जरी चेति ॥
सौभाञ्जनकश्चःहरितपर्यायैबहलपल्लवोऽनिलजित् । **(Aa.Ma)**

Synonyms are: sigru, mulaka patra, bahula dala, tiksna gandha, apadamsa, sighraphala, bahula tvak, haritasakha.

Madhu sigru, sveta marica, madhu srava, krsna gandha, saubhanjanaka, sigruka, murangi, acchavrksa, mukha vasa, vayastha are the synonyms for sveta manjari.
Bahala, sveta taru, sveta manjari, saubhanjanaka, harita, bahala pallava, anilajit are also its synonyms.

शोभाञ्जन: शिग्रुतीक्ष्णगन्धकाक्षीव मोचकाः ॥
तद्बीजं श्वेतमरिचं मधुशिग्रुस्तु लोहितः । **(Bpn)**

Sobhanjana, sigru, tiksna gandha, aksiva, mocaka are the synonyms for sigru.

Synonyms of its bija are sveta marica, madhu sigru, lohita.

शिग्रुर्हरितशाकश्च शाकपत्रः सुपत्रकः ।
उपदंशः क्षमादंशो ज्ञेयः कोमलपत्रकः ॥
बहुमूलो दंशमूलस्तीक्ष्णमूलो दशाह्वयः ।

शोभाञ्जना नीलशिग्रुस्तीक्ष्णगन्धी जनप्रियः ||
मुखामोदः कृष्णशिग्रुश्चक्षुष्यो रुचिरञ्जनः |

श्वेतशिग्रुः सुतीक्ष्णः स्यात् मुखभङ्गः सिताह्वयः ||
समूलः श्वेतमरिचो रोचनो मधुशिग्रुकः |

रक्तको रक्तशिग्रुः स्यात् मधुरो बहुलच्छदः ||
सुगन्धकेशरः सिंहो मृगारिश्च प्रकीर्त्तितः | **(Rjn)**

Harita saka, sakapatra, supatraka, upadamsa, ksamadamsa, komala patraka, bahumula, damsamula, tiksna mula are the synonyms of sigru.

sobhanjana are nila sigru, caksushya, ruci ranjana.

sveta sigru are sutiksna, mukhabhanga, sitahvaya, samula, svetamarica, rocana, madhusigruka.

Synonyms of rakta sigru are raktaka, raktasigru, madhura, bahulacchada, sugandhakesara, simha, mrgari.

शोभाञ्जनः कृष्णगन्धो मुरङ्गी शालनक्षमः |
घनच्छदस्तीक्ष्णगन्धो मोचको बहलच्छदः ||
अवदंशो मूलपर्णी मुखभङ्गो हरिच्छदः |
सुभञ्जनो विद्रधिघ्नश्चाक्षीवो मूलकच्छदः ||

रक्तोऽन्यो मधुशिग्रुः स्यात् मधुरो मधुगन्धिकः |
स्वादुगन्धिः गृञ्जनकः शीघ्रकः सिंहकेशरी ||

शिग्रुर्हरितशाकोऽन्यः श्वेतः श्वेतमरीचकः |

तद्बीजं श्वेतमरिचं शिग्रुतैलं च बैजिकम् ॥ **(Kdn)**

Synonyms of sobhanjana are krsna gandha, murangi, salanaksama, ghanachada, tiksna gandha, mocaka, bahalachada, avadamsa, mulaparni, mukhabhanga, haricchada, subhanjana, vidradhighna, aksiva, mulakacchada.

Synonyms of rakta variety are madhu sigru, madhura, madhugandhika, svadugandhi, grnjanaka, sigraka, simhakesari.

Second variety of Sigru harita saka is Sveta, Sveta marica.

Synonyms of its bija are svetamarica, sigru taila, baijika.

रसासृक्पित्तशमनः प्लीहघ्नः कृमिहा लघुः ।
तिक्तो वीर्ये बिमः शिग्रुः चक्षुष्यो विद्रधौ हितः ॥ **(Mdn)**

Sigru is tikta in rasa, laghu in guna, hima in veerya, caksushya, pacifies rasa, asrk, pitta, alleviates pliha, krmi, vidradhi.

शिग्रुः कटुः कटुःपाके तीक्ष्णोष्णे मधुरो लघुः ।
दीपनो रोचनो रूक्षः क्षारतिक्तो विदाहकृत् ॥
संग्राहि शुक्ललो हृद्यः पित्तरक्तप्रकोपणः ।
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुकृमीन् ॥
मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् ।

श्वेतः प्रोक्तगुणो ज्ञेयो विशेषात् दीपनः परः ॥
प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तहृत् ।

मधुशिग्रुः प्रोक्तगुणो विशेषात् दीपनः सरः ॥

शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहृत् ।

चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् ॥
अवृष्यं कफवातघ्नं तन्नस्येन शिरोर्त्तिनुत् । **(Bpn)**

Sigru is katu, madhura, tikta in rasa, and paka, tiksna, laghu, ruksa in guna, usna in veerya, dipana, rocana, ksara, vidaha kara, sangrahi, sukrala, hrdya, caksushya, increases pitta, rakta, alleviates kapha, vata, cures vidradhi, svayathu, krmi, meda, apaci, visha, pliha, gulma, ganda and vrana.

Sveta variety is similar in guna but is specifically daha kara, alleviates pliha, vidradhi, vrana, pitta and rakta dosha.

Madhu sigru is sara in guna, dipana,

Sigru valkala and patra svarasa is parama arti hara and caksushya.

Sigru bija is tiksna in guna, usna in veerya, visa nasana, avrshya, alleviates kapha and vata, on nasya it alleviates siro roga.

शिग्रुस्तिक्तः कटुश्चोष्णः कफशोफसमीरजित् ।
कृम्यामविषमेदोघ्नो विद्रधिप्लीगुल्मनुत् ॥ **(Dhn)**

Sigru is tikta and katu in rasa, usna in veerya, alleviates kapha, sopha, samira, krmi, visa, medo, vidradhi, pliha and gulma.

शिग्रुश्च कटुतिक्तोष्णस्तीक्ष्णो वातकफापहः ।
मुखजाड्यहरो रुच्यो दीपनो व्रणदोषनुत् ॥

शोभाञ्जनः तीक्ष्णकटुः स्वादूष्णः पिच्छिलस्तथा ।
जन्तुवातर्त्तिशूलघ्नश्चक्षुष्यो रोचनः परः ॥

श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिकृन्तनः ।
अङ्गव्यथाहरो रुच्यो दीपनो मुखजाड्यनुत् ॥

रक्तशिग्रुर्महावीर्या मधुरश्चं रसायनः ।
शोफाध्मानसमीरार्त्तिपित्तश्लेष्मापसारकः ॥ **(Rjn)**

Sigru is Katu, Tikta in Rasa, Usna in Potency, tiksna in Guna, Vata-Kapha hara, Mukha jadya hara, Rucya, Dipana, Vrana dosha hara.

Sobhanjana is Tiksna in Guna, Katu, Svadu in rasa, Usna in Potency, Picchila in Guna, Jantu-Vata arti-Sulaghna, Caksushym, Rocana param.

Sveta Sigru is Katu in Rasa, Tiksna in Guna, Sopha-Anila hara, Angavyatha hara, Rucya, Dipana, Mukha jadya hara.

Rakta Sigru is Maha virya, Madhura in Rasa, rasayana, cures Sopha, Adhmana, Asmari, Samira roga, Pitta, Slesma sara.

शिग्रुः क्टुः क्टुःपाके तीक्ष्णोष्णो मधुरो लघुः ।
दीपनो रोचनो रूक्षः क्षारतिक्तो विदाहकृत् ॥
संग्राह्ल्यशुक्ललो हृद्यः रक्तपित्तास्त्रकोपनः ।
चक्षुष्यः कफवातघ्नी हन्ति श्वयथुविद्रधीन् ॥
मेदोऽपचीविषप्लीहगुल्मगण्डव्रणकृमीन् ।

मधुशिग्रुः कटुस्तिक्तः शोफघ्नी दीपनः सरः ॥

तत्पत्रं शुक्लहृत् स्निग्धं मेदःकृमिहरं गुरु ।

शिग्रुजं कुसुमं जन्तुकफपित्तहरं परम् ॥
सकषायं गुरु ग्राहि चक्षुष्यं कृमिनाशनम् ।

तथा मुरङ्ग्याः पुष्पं तु श्लेष्मलं कृमिनाशनम् ||
पित्तहृद् दृष्टिपथ्यं स्याद्रक्तपित्तप्रसादनम् |

शोफाञ्जनफलं स्वादु कषायं कफपित्तजित् ||
शूल कुष्ठक्षयश्वासगुल्मघ्नं दीपनं परम् |

चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् ||
अवृष्यं कफवातघ्नं तन्नस्येन शिरोर्त्तिनुत् | **(Kdn)**

Sigru is Katu in Rasa and Paka, Tiksna in Guna, Usna in Potency, madhura in Rasa, Laghu in Guna, Dipana, rocana, Ruksa, Ksara, tikta in Rasa, Vidaha kara, Sangrahya, Sukrala, Hrdya, Raktapitta Asra kopana, Caksushya, Kapha Vataghna, cures Svayathi, Vidradhi, Meda, Apaci, Visa, Pliha, Gulma, Ganda vrana, Krmi.

Madhu sigru is Katu, Tikta in Rasa, Sophaghna, Dipana, Sara.

Its Patra is VataPittaghna, Caksushya, Svadu in Rasa, Sita in Potency, Brmhana, Sukra hrt, Snigdha, Meda-Krmi hara, Guru in Guna.

Its Kusuma is Jantu-Kapha-Pitta hara para.

Its Kashaya is Guru in Guna, Grahi, Caksushya, Krmi nasana.

Murangayaha Puspa is Slesmala, Krmi nasana, Pitta hara, Drsti pathya, Raktapitta prasadana.

Sobhanjana phala is Svadu, Kashaya in Rasa, Kapha Pitta hara, Sula-Kustha-Ksaya-Svasa-Gulmaghna, Dipana Param.

Its Bija is Caksushya, Tiksna, Usna in Potency, Visa nasana, Avrsya, Kapha Vataghna, on Nasya it is Siro Roga hara.